रौप्यपीठकृष्णस्तुतिः

पालयाच्युत पालयाजित पालयाकमलालय ।
लीलया धृतभूधराम्बुरुहोदर स्वजनोदर ॥ ध्रु० ॥

मध्वमानसपद्मभानुसमं स्मर प्रतिसंस्मर
स्निग्धनिर्मलशीतकान्तिलसन्मुखं करुणोन्मुखम् ।
हृद्यकम्बुसमानकन्धरमक्षयं दुरितक्षयं
स्निग्धसंस्तुतरौप्यपीठकृतालयं हरिमालयम् ॥ पालया॥ १॥

अङ्गदादिसुशोभिपाणियुगेन संक्षुभितैनसं
तुङ्गमाल्यमणीन्द्रहारसरोरसं खलनीरसम् ।
मङ्गलप्रदमन्थदामविराजितं भजताजितं
तं गृणे वररौप्यपीठकृतालयं हरिमालयम् ॥ पालया॥ २॥

पीनरम्यतनूदरं भज हे मनः शुभ हे मनः
स्वानुभावनिदर्शनाय दिशन्तमर्थिसुशन्तमम् ।
आनतोऽस्मि निजार्जुनप्रियसाधकं खलबाधकं
हीनतोज्झितरौप्यपीठकृतालयं हरिमालयम् ॥ पालया॥ ३॥

हेमकिङ्किणिमालिकारसनाञ्चितं तमवञ्चितं
रक्तकाञ्चनचित्रवस्त्रकटिं घनप्रभया घनम् ।
कम्रनागकरोपमोरुमनामयं शुभधीमयं
नौम्यहं वररौप्यपीठकृतालयं हरिमालयम् ॥ पालया॥ ४॥

वृत्तजानुमनोज्ञजङ्घममोहदं परमोहदं
रत्नकल्पनखत्विषा हृतमुत्तमस्स्तुतिमुत्तमम् ।

प्रत्यहं रचितार्चनं रमया स्वयाऽऽगतयास्वयं
चित्त चिन्तय रौप्यपीठकृतालयं हरिमालयम् ॥ पालया॥ ५॥

चारुपादसरोजयुग्मरुचाऽमरोच्चयचामरो-
दारमूर्धजभानुमण्डलरञ्जकं कलिभञ्जकम् ।
वीरतोचितभूषणं वरनूपुरं स्वतनूपुरं
धारयाऽऽत्मनि रौप्यपीठकृतालयं हरिमालयम् ॥ पालया॥ ६॥

शुष्कवादिमनोऽतिदूरतरागमोत्सवदागमं
सत्कवीन्द्रवचोविलासमहोदयं महितोदयम् ।
लक्षयामि यतीश्वरैः कृतपूजनं गुणभाजनं
धिङ्कृतोपमरौप्यपीठकृतालयं हरिमालयम् ॥ पालया॥ ७॥

नारदप्रियमाविशाम्बुरुहेक्षणं निजलक्षणं
तारकोपमचारुदीपरुचान्तरे गतचिन्त रे ।
धीर मानस पूर्णचन्द्रसमानमच्युतमानम-
द्वारकोपमरौप्यपीठकृतालयं हरिमालयम् ॥ पालया॥ ८॥

रौप्यपीठकृतालयस्य हरेः प्रियं दुरिताप्रियं
तत्पदार्चकवादिराजयतीरितं गुणपूरितम् ।
गोप्यमष्टकमेतदुच्चमुदे ममास्त्विह निर्मम
प्राप्यसौख्यफलाय तत्र सुकोमलं हृतधीमलम् ॥

पालयाच्युत पालयाजित पालयाकमलालय ।
लीलया धृतभूधराम्बुरुहोदर स्वजनोदर ॥ ९॥

इति श्रीमद्वादिराजपूज्यचरणविरचिता

श्रीरौप्यपीठकृष्णस्तुतिस्समाप्ता

भारतीरमणमुख्यप्राणान्तर्गत श्रीकृष्णार्पणमस्तु